## नाम्रेडितस्यान्त्यस्य तु वा। (९९/८२)

अव्यक्तानुकरणस्य आम्रेडितस्य यो अत्शब्दः इतौ[1] तस्य पररूपं न भवति, तस्य योऽन्त्यस्तकारस्तस्य व भवति। पटत्पटदिति, पटत्पटेति करोति। 'नित्यवीप्सयोः' (८.१.४/२१४०) इति द्विर्वचनम्। यदा तु समुदायानुकरणं तदा भवत्येव पूर्वेण पररूपम्, पटत्पटिति करोति ॥

## नित्यमाम्रेडिते डाचि। (१००/२१२८)

अव्यक्तानुकरणस्य, [2]अतः, अन्त्यस्य इति चानुवर्तते। डाच्परं यदाम्रेडितं तस्मिन् पूर्वस्य अव्यक्तानुकरणस्य अच्छब्दस्य योऽन्त्यः तकारः तस्य पूर्वस्य परस्य [3]चाद्यस्य वर्णस्य नित्यं पररूपमेकादेशो भवति। पटपटा करोति। दमदमा करोति[4]। पटदित्यस्मात् अव्यक्तानुकरणात् इति डाचि विहिते डाचि बहुलम् (वा. ६९१) इति द्विर्वचनम्,। [5]तच्च टिलोपात् पूर्वमेवेष्यते ॥

## अकः सवर्णे दीर्घः। (१०१/८८)

अकः सवर्णे अचि परतः पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति। दण्डाग्रम्[6]। दधीन्द्रः। [7]मधूदके। होतॄश्यः। अकः इति किम्? अग्नये। सवर्णे इति किम्? [8]दध्यत्र। अचि इत्येव, कुमारी शेते। 'नाज्झलौ' (१.१.१०/१३) इत्यत्र यत् अच् इति प्रत्याहारग्रहणं तत्रग्रहणकशास्त्रस्य अनभिनिर्वृत्तत्वात् सवर्णा न गृह्यन्त इति सवर्णत्वमीकारशकारयोरप्रतिषिद्धम्।

[६९०] सवर्णदीर्घत्वे ऋति ऋ वावचनम्। (म. भा. ३.७७)

ऋति सवर्णे परभूते [9]तत्र ऋ वा भवति इति वक्तव्यम्। होतृ ऋकारः होतृकारः। यदा न ऋ तदा दीर्घ एव होतॄकारः।

[६९१] ऌति ऌ वा वक्तव्यम्। (म. भा. ३.७७)

ऌति सवर्णे परतो ऌ वा भवति इति वक्तव्यम्। होतृ ऌकारः होत्ऌकारः। होतॄकारः। ऋकार-ऌकारयोः [10]सवर्णासञ्ज्ञाविधिरुक्तः। दीर्घपक्षे तु समुदायान्तरतमस्य ऌवर्णस्य [11]दीर्घस्याभावात् ॠकारः[12] क्रियते[13] ॥

## प्रथमयोः पूर्वसवर्णः। (१०२/१६४)

अकः [14]इति दीर्घः इति वर्तते। प्रथमाशब्दो विभक्तिविशेषे रूढः, तत्साहचर्याद् द्वितीयाऽपि प्रथमा इति [15]उक्ता। तस्यां प्रथमायां द्वितीयायां च विभक्तौ अचि [16]अकः पूर्वपरयोः [17]स्थाने पूर्वसवर्णदीर्घः एकादेशो भवति। अग्नी। वायू। वृक्षाः। प्लक्षाः। वृक्षान्। प्लक्षान्। 'अतो गुणे' (६.१.९७/१९१) इति [18]यदकारे पररूपं तत् अकः सवर्णे दीर्घत्वमेव (६.१.१०१/८५) बाधते, न तु पूर्वसवर्णदीर्घत्वम्, 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (व्या. प. ९) इति।

अचि इत्येव, वृक्षः। प्लक्षः। अकः इत्येव, नावौ। पूर्वसवर्णग्रहणं किम्? अग्नी इत्यत्र [19]पक्षे परसवर्णो मा भूत्। दीर्घग्रहणं किम्? त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थम् ॥

---

1. परतः तस्मात् परो यः इतिशब्दः तयोः पररूपं न भवति क. 2. अतः नास्ति ग. 3. चादेः ह. 4. मदमदा करोति इत्यधिकम् ङ. 5. वक्तव्यम् इति इत्यधिकम् ह. 6. क्षुराग्रम् खड्गाग्रम् इत्यधिकम् क. फ. 7. मधूष्ट्रम् क, मधूष्ट्रः ङ. 8. मध्वत्र क. फ. 9. तत्र नास्ति फ. 10. सवर्णविधिः ङ. 11. दीर्घाभावात् क. 12. एव इत्यधिकम् ब. 13. होतॄकारः इत्यधिकम् क. 14. इति नास्ति ग. 15. उक्तम् ग 16. अचः क. फ. ग. ह. 17. स्थाने नास्ति ग. 18. अकारे ह. 19. पक्षे नास्ति क.